International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 117-122
© 2026 IJMH
www.themultijournal.com
Received: 14-07-2026
Accepted: 08-08-2026
Publish : 10-08-2026

**डॉ. आनन्द मोहन जोशी**
असि. प्रोफेसर, संस्कृत विभाग,
स्पर्श हिमालय विश्वविद्यालय,
देहरादून

**Correspondence:**
**डॉ. आनन्द मोहन जोशी**
असि. प्रोफेसर, संस्कृत विभाग,
स्पर्श हिमालय विश्वविद्यालय,
देहरादून

# सांख्ययोगदर्शने प्रतिपादितान्तःकरणस्वरूप-निरूपणम्

**डॉ. आनन्द मोहन जोशी**

सांख्ययोगदर्शने प्रकृतेः प्रथमं कार्यम्महत्तत्त्वमस्ति। यस्याऽस्ति मुख्यरूपेण परिगृह्यमाणोऽयं सम्बोधनम्। अध्यवसायो निश्चय चेति। अनेनैतत् प्रकटीभवति यत् प्रकृतेराद्य-कार्यम्महत्तत्त्वमस्ति तच्चाऽस्ति निश्चयात्मकाऽध्यवसायस्वरूपकम्। इति कृत्वैव तत्त्वस्यास्य नामान्तरम्बुद्धिरिति । कथनस्यास्य तात्पर्यमिदमस्ति यदेतत्तत्त्वं कीदृशमस्ति किं स्वरूपकञ्च। विषयोऽयं गाम्भीर्यपूर्णो रहस्युक्तश्चास्ति । यद् बुद्धयारन्यस्य महत्तत्त्वस्य रचना केन प्रकारेण भवति। तथापि तद्विषये कानिचिद् वाक्यानि प्रस्तूयन्ते। आदिसर्गे यदा सत्वरजस्तमोगुणानां साम्यावस्थायाम्प्रकृतौ नियत्तु चैतनस्या प्रेरणया क्षोभो भवति। क्षोभात् प्राक् सर्वे गुणाः साम्यावस्थायां प्रशान्तास्तिष्ठन्ति।

सूक्ष्मातिसूक्ष्मारनन्ताश्च सत्त्वरजस्तमोगुणाः मूलतत्त्वस्वरूपायाः महाशक्तेः पुञ्जाः परस्परं विलक्षणस्वभावयुक्ताः सन्तोऽपि यावत् कालपर्यन्तं कस्मिंश्चिदपि स्वरूपे परिणन्तु सर्वथा प्रवृत्तिराहित्यम्भजन्ते। तेषां साऽवस्थैव प्रकृतिरिति नाम्ना समपदिश्यते। यदा चेतनस्य प्रेरणया ते गुणाः विक्षुब्धाः सन्तः वैषम्यमधिगन्तुं प्रवर्तन्ते। तदा क्रमशः सर्वोऽपि विकारव्यूहो प्रकटी भवति। तस्मिन् विकारव्यूहे सर्वतः प्राक् महत्तत्त्वं प्रकटीभवति।

सर्वतः प्रागस्माभिरवधेयं यत् सत्त्वरजस्तमसु विक्षोभे जाते सति यदा तेषु सर्गोन्मुखी च प्रवृत्तिर्भवति। विकासोन्मुखी वा प्रवृत्तिर्भति। तदा विक्षोभे तत्कालमेव महत्तत्त्वमाविर्भवति। वा विक्षोभस्य स्थितेः समारभ्य महत्तत्त्वोत्पत्तिं यावदन्तरालेऽपि च कश्चन क्रमानुक्रमो भवति। केचन महर्षयः केचनाऽऽचार्याश्च प्रतिपादयामासुर्यतगुणविक्षोभस्य बुद्धिप्रादुर्भावस्य चान्तराले मूलतत्त्वेष्ववश्यमेवै-तादृशि परिवर्तनानि जायन्ते। यानि कारणवस्थायाः साम्यावस्थायां सुपारयामासु परन्तु तावत् सुनिश्चितङ्कार्यरूपं वा नाधिजग्मुः। तत्त्वानां स्थितिमेनां प्रकटी-कर्तुमाचार्यैः विभिन्नानि नामानि दत्तानि सन्ति। युक्तिदीपिकायारष्टोत्तरशतसंख्याके पृष्ठे लिखितमस्ति यत् केचिदाहु प्राधानादनिर्देश्यस्वरूपन्त-त्वान्तरमुत्पद्यते ततो महानिति कैश्चित् सांख्याचार्यैः प्रातिपादितं यत् -

प्रधानान् निर्देश्य स्वरूपिणस्तत्त्वान्तरस्योत्पत्तिर्भवति। तदनन्तरं महान् समुद्भवति। सत्त्वरजस्तमसुः विक्षोभतो महत् तत्त्वस्योत्पत्यन्तराले मूलोपादानस्यै-तादृश्याः स्थितेः सङ्केतोऽस्ति। सांख्यविचारपद्धतिं समनुसृत्य बुद्धिरचनायां सत्त्वगुणस्याधिकम्भवत्युपयोजनम्। यद्यपि जगत्सु प्रत्येकं वस्तु त्रिगुणात्मकमस्ति । त्रयाणामपि गुणानान्योन्याधिक्येन भवति समुपयोजनम्। वस्तुतस्तु गुणानां परमविशुद्धिस्वरूपन्तेषां साम्यावस्थाऽस्ति सैवं चाऽस्ति कारणावस्था।

अत एव बुद्धितत्त्वस्य रचनायामपि त्रयाणामेव गुणानां सामञ्जस्यमस्ति । वस्तुतः महत्तत्त्वस्य रचना या कियत् सत्त्वं, कियद् रजः कियञ्चतमो गुह्यतः इति सुनिश्चितरूपेण सुनिर्धारितमात्रावच्छेदेन वा व्यपदेष्टुन्नैव शक्यते।

बुद्धिरचनाविषयेऽस्माभिरेतदवगतं यत् सत्त्वगुणप्रधानं त्रिगुणं कतिपय-परिवर्तनान्तरं बुद्धिरूपेण परिणमति। अव्यक्तं मूलकारणमत्र प्रथमव्यक्तम्भवति तदा प्रकृतिरिति नामकं भवति । किन्तु तदेव तत्त्वं सत्त्वप्रधानेन स्वस्वरूपेण व्यक्तं सत् महत्संज्ञा लभते। अव्यक्तं यदा रचनाम्प्रति प्रवर्तते। तदा तदेव व्यक्तरूपताम्भजते। सर्वस्मिन्नपि कार्यरूपे व्यक्तसमूहे महत्तत्वमेवाऽस्ति सूक्ष्मतमतत्त्वम्। रचनाया समभिवृद्धः क्रमशः स्थौल्यम्प्रवर्धते। तथा चाऽध्यात्मरचना तिष्ठति सूक्ष्मावस्थायाम्।

अध्यात्मसृष्टौ त्रयोदशकरणानां समावेशो वर्तते तानि सर्वाण्यपि कारकाणि सर्वथा भवन्त्यतीन्द्रियाणि तेष्वैव च वर्तते महत्तत्त्वं सर्वाधिकं सूक्ष्मम्। व्यक्तेऽस्मिन् तत्वग्रामे व्यक्तायां सृष्टौ नास्ति किमप्येतादृक् तत्त्वान्तरं यद् भवन्महत्तत्त्वतोऽपि सूक्ष्मं स्यात्। अतएव अव्यक्तावस्थायाः व्यक्तावस्था-याम्परिणतौ व्यक्तिभूतं प्रथमं तत्त्वमैतदेव वर्तते। एतन्महत्तत्त्वमेवास्ति सर्वप्रथमं कार्यम्।

सम्भवतोऽत्रैवस्मादेव कारणात् तत्त्वमेतन्महत्तत्त्वनाम्ना व्यवह्रियते। महत्तत्त्वमेव च तत्त्वान्तरापेक्षयाऽऽत्मनोऽधिकतमममन्तिकं वसन् निष्पादयति भोगापवर्गयोः इत्यस्मादपि हेतौ सर्वप्रथमव्यक्तं व्यक्तरचयाम्प्रथमतमं कार्यं। बुद्धितत्त्वमेव वर्तते इति। तत्त्वानां समुत्पत्तिक्रमश्च यतोऽत्र सांख्यशास्त्रे निर्दिष्टोऽस्ति ।

सांख्यदृशा आत्मनः समनुसृत्य बुद्धि-सर्गः सञ्जायते। तथा च सन्त्यात्मानो ह्यनन्ताः। अत एवादिसर्गे बुद्धिश्चापि समुद्भवत्यन्ता। प्रत्येकेनाऽऽत्मना सह भवति बुद्धितत्त्वमपि परमावश्यकम्। प्रलयानन्तरं यदा आत्मा सर्वप्रथमं शरीरबन्धनमधिगच्छति, तदा तस्य सहयोगाय सर्वप्रथमं निर्मता बुद्धिः समुपतिष्ठते। आदिसर्गे वा यदा कदा प्रथमं शरीरतत्त्वं समधिगतमात्मना सह यस्याः बुद्धेः सहयोगो भवति तेन सह तस्याः ग्रथिरैषा समान्यतस्तु प्रलयं यावत्तिष्ठति। न केवलं प्रलयं यावदपि तु विवेकख्यातिपूर्वकं मोक्षप्राप्तिः यावद् भवति। परं यदि कश्चन आत्मा स्वस्वरूपं साक्षात् कुर्यात् तर्हि स आत्मा तु निश्चितरूपेण बुद्धयादिभ्यो पृथग्भूय विमुक्तो भवति। आत्मना सह बुद्धिसर्गोऽपि भोगापवर्गयोः सिद्धयै भवत्येवेति निश्चप्रचम्। यद्यपि बुद्धितत्त्वं स्वयं जडतत्त्वमस्ति तथापि चैतन्याधिष्ठितं भोग्यान् भोक्तुं करोति, चैतन्यस्य सहाय्यं चिच्छायापत्या। वस्तुतस्तु भोगाश्चापि प्रकृतेः बुद्धेर्वा सन्ति। यतोऽयमात्मा तु नित्यशुद्धबुद्धमुक्तस्वभावश्चास्ति। परमत्र बुद्धेः परमसान्निध्यवशात् स्वयं बुद्धिव्यवहारान् एवाहङ्कारपारवश्यात् स्वकर्मत्वेन स्वीकरोति । तथा चानेन प्रकारेण बुद्धौ भवति सामन्यापि वस्तुन्यैतानि सन्ति। प्राकृतानि कर्माध्यपि च सन्ति सर्वाणि प्रकृतान्यैव नास्ति मामकीना कश्चन नित्यः सम्बन्धे येभिरित्येव सेन्द्रियम्बुद्धितत्त्वमध्यवसायसामान्यपि कर्माणि करोति तथैव विकरोति।

उपर्युक्तवर्णनेन स्पष्टीभवति यदेतन्महत्तत्त्वमस्ति प्रकृतेः प्रथमं कार्यम्। तथा च बुद्धेश्चेतनाऽतिरिक्ता वर्तते। तत्त्वमैतदमपि वर्तते। त्रिगुणात्मकं व्यक्तेषु समेष्वपि वर्तते सूक्ष्मातिसूक्ष्मन्तव्यक्तेषु वर्तते सर्वोत्कृष्टं तत्त्वं तत्त्वमैतत्। सत्त्वप्रधानमात्मनश्च भोगापवर्गसाधने वर्तते परमोपकारकं नैदीयस्तत्वमैतत् सर्गादावैव नैकशः समुद्भवति कर्माशयानुशरीरबन्धनप्राप्तौ चात्मानं गृह्णाति। तथा च स्थूलशरीरे विनष्टेऽपि आत्मतत्त्वज्ञानं सूक्ष्मशरीरे स्वाधिष्ठाता आत्मना सह तिष्ठति। देहाद् देहान्तरञ्च प्रयाति। जाते च तत्त्वज्ञाने आत्मा मुक्तो भवति तथा चैत्ततत्त्वमपि स्वकारणभूतायाम्मूलप्रकृतौ लयमेति (भोगान्)।

भगवता महर्षिणा कपिलेन विरचिते सांख्यशास्त्रे द्वितीयेऽध्याये त्रयोदशतमसूत्रतः समारभ्य पञ्चदशतमं सूत्रं यावन्महत्त्वस्वरूपं प्रतिपादितम्।

तद्यथा-

जगति कस्मिंश्चिदपि पदार्थैः सर्वतः प्रागिन्द्रियसन्निकर्षो समापतति, तदनन्तरमन्यविषये पदार्थे इममित्थम्भूतोऽस्ति तथा चेत्थम्भूतो नास्तीति ज्ञायते। तदनन्तरम्मयेत्थमाचरणीयमथवा नेत्थमाचरणीयमिति सन्दिह्यते। अन्ततो गत्वा सर्वथैतन्निश्चीयते यदेतन्मया समाचरणीयमिति। तदनन्तर मानवो काचित्कर्माणि करोति कानिचिच्च विजहाति। एषा चरमनिर्णयाऽऽत्मिका शक्तिरेव बुद्धितत्त्वनाम्ना समभिधीयते यस्य लक्षणत्वेनाध्यवसायशब्दः प्रयुक्तोऽस्ति।

निश्चयात्मकः व्यापारो बुद्धिः वर्तते क्रिया, वृत्तिः, व्यापारश्चैते एकार्थवाचिनः शब्दाः वर्तन्ते। इदं मम कर्त्तव्यम्। इदं कार्यमनेन कर्मणा सिद्धयति। इत्थमिह निश्चयानन्तरं पुरुषमात्रस्य कार्येषु प्रवृत्तिः दृश्यते। अत एव प्रोक्तो निश्चयात्मको व्यापार एव बुद्धितत्त्वेन स्वीक्रियते इति। यथा बीजे पश्चात्प्रकटीभविताऽङ्कुरकः सुनिश्चितरूपेण भवत्येव। तथा चासौ घट मृत्तिकायामेव वर्तते तथा चायम्पट एव वर्तते इति च चैवमेव सर्वेषामपि पदार्थानामवबोधेन निश्चयोऽयं यथा शक्त्या भवति येन च तत्त्वेन निश्चयोऽयम्भवति तदेव तत्त्वं बुद्धिरित्यभिधीयते।

बुद्धिश्चेयं सात्त्विकी तामसीति भेदाद्विविधा भवति। सात्त्विकी बुद्धिश्चतस्रर्विधा भवति तथा चेत्थमेवतामसी बुद्धिश्चाऽपि भवति। सात्त्विक्यास्तामस्याश्च बुद्धेः सर्वान् भेदान् सम्मेत्यष्टौ रूपाणि जायन्ते। तत्र च बुद्धेः सात्त्विकाः भेदाः सन्ति धर्मो ज्ञानं वैराग्यमैश्वर्यञ्चेति। एतेष्वपि धर्मो यथा दया-दान-यम-नियमात्मको भवति। तत्रापि चाऽहिंसा सत्यास्तेय ब्रह्मचर्यापरिग्रहाः। तत्र चापि शौचसन्तोषतपस्वाध्याय ईश्वर-प्रणिधानानीत्येतदाख्याः सन्ति। एवं पञ्चविधो भवति नियमः। ज्ञानमपि प्रकाशावगमनापर-पर्यायात्मकम्भवति तदपि च पुनर्द्विविधम्भवति बध्याभ्यन्तरञ्चेति ।

महत्त्वत्त्वं रजस्तमोभ्यां सह सम्बन्धात् अधर्मस्वरूपात्मकम्भवति। अर्थात् यदा बुद्धया सह रजस्तमयोः गुणयोः सम्बन्धो भवति। तदा बुद्धेः अधर्माज्ञानावैराग्यानैश्वर्यादीनि कार्याणि जायन्ते। कथनस्यास्य तात्पर्यमिदमस्ति[1]

यानि कानिचिदपि अधर्मादीति कार्याणि भवन्ति तानि सर्वाणि राजसा बुद्धे तामसबुद्धेश्च समुत्पद्यन्ते।'

इत्थमिह महत्तत्वस्वरूपं प्रतिपादितमस्ति। यतोऽत्र महत्तत्त्वस्वरूपां बुद्धिमेव त्रिविधसत्त्वादिगुणस्वरूपात्मिकां स्वीकुरुते। तथा च तस्या त्रिविधगुणानु-सारेणापि कार्याणि पृथक् पृथग्तया स्वीक्रियेततराम्।

महर्षिणा कपिलेन विरचिते सांख्यशास्त्रे द्वितीयेऽध्याये त्रयत्रिंशत्तमे सूत्रे महत्तत्त्वस्वरूपं प्रतिपादितमस्ति । तच्चेत्थम् -

'प्रमाण-विपर्यय-विकल्प निन्द्रा स्मृतयश्चेति बुद्धेः वृत्तयः पञ्चधा स्वीक्रियते। ह्येतेषु राजसावृत्तयो क्लिष्टाः वर्तन्ते, तथा च सात्विकयो वृत्तयो अक्लिष्टाः स्वीक्रियते ।

इत्थमिह महत्तत्वस्वरूपं प्रतिपादितमस्ति। यतोऽत्र बुद्धेः वृत्तयाः पञ्चधासन्त्यपि क्लिष्टाक्लिष्टेति द्वाभ्यां भेदाभ्यां ताः प्रतिपाद्यन्तेतरामिति।

भगवता महर्षिणा कपिलेन विरचिते सांख्यशास्त्रे द्वितीयेऽध्याये चत्वारिंशत्तमसूत्रतः समारभ्य षड्चत्वारिंशत्तमसूत्रं यावत् महत्तत्त्वस्वरूपं प्रतिपादितमस्ति। तद्यथा-

मननशक्त्यात्मकत्वात् बुद्धिरेव मनः स्वरूपेण ज्ञायते। यथा भृत्येषु कश्चिद्धृत्यः राज्ञा मुख्यरूपेण स्वीक्रियते', इत्थमिह सर्वेष्विन्द्रियेषु बुद्धिः

अध्यवसायो बुद्धिधर्मो ज्ञानं विराग ऐश्वर्यम्।[2]

मुख्याऽस्ति यतः सर्वाणीन्द्रियाणि बुद्धयाश्रितानि सन्ति। सर्वेष्विन्द्रियेषु व्यापकत्वात् बुद्धिः श्रेष्ठतमा वर्तते। अन्यानीन्द्रियाणि नैव अत एव बुद्धिरेव प्रधानतमाऽस्ति।' यदिह चक्षुरादीनीन्द्रियाणि

प्रधानरूपेण स्वीक्रियन्ते। तर्हि तैः इन्द्रियैः अन्धादयः पुरुषाः स्मरिष्यन्ति परन्तु नैत्थं भवति। अनेन चक्षुरादीनीन्द्रियाणि मुख्यानि नैवापितु बुद्धिरेव मुख्यरूपास्ति।

तथा च स्मृत्यानुमित्वादपि बुद्धिरेव मुख्या वर्तते। अर्थात् पूर्वानुभूतान् पदार्थान् विषयीकुर्वत्या स्मृतिरूपया दृष्ट्या बुद्धिरेव मुख्यतानुमीयते बुद्धौ स्वतो करणत्वं नैव सिद्धयति। अत एवान्यानि करणानि स्वीकर्त्तव्यानि भवन्तीति निश्चप्रचम्।

व्यापारविशेषनिमित्तेन्द्रियाणां गौणभावो मुख्यभावश्चापेक्ष्यते। अर्थात् चक्षुरादिषु इन्द्रियेषु गौणमुख्यभावो परस्परं सापेक्षत्वापि भवति। यथा चक्षुरादीनां दशेन्द्रियः सापेक्षा मनः प्रधानमस्ति। मनोऽपेक्षयाऽहङ्कारः श्रेष्ठतमो वर्तते। अहङ्कारापेक्षया च बुद्धिरेव प्रधानाऽस्ति। यथा लोके कर्ता स्वस्वामिनो चेष्टाः करोति। इत्थमिह जीवानामदृष्टैः पुरुषस्य प्रयोजनार्थमिन्द्रियाणां चेष्टाः विलीयन्ते। आशयोऽस्ति यदीन्द्रियाणां चेष्टायाः हेतुः जीवानामदृष्टा वर्तन्ते।[3]

यथा लोके नृपस्य सर्वेषु भृत्येषु राजपात्ररूपेण कर्मणा सामानतया अपि प्रधान्यं मन्त्रिणमेव प्राप्यते। इत्थमिह चक्षुरादिषु इन्द्रियेषु बुद्धिरेव प्रधानतमा स्वीक्रियते। यतः चक्षुरादीनीन्द्रियाणि विषयानधिकृत्य बुद्धयै समर्पयन्ति। अत एव बुद्धिः पुरुषाय समर्पयते। अनेन मन्त्रिणमिव बुद्धेः प्रधानता प्राप्यते।

इत्थमिह महत्तत्त्वस्वरूपं प्रतिपादितमस्ति। यतोऽत्र मननत्वेन बुद्धिः मनः स्वरूपात्मकापि स्वीक्रियते। तथा च सर्वेष्वन्द्रियेष्वपि बुद्धिः सर्वश्रेष्ठा स्वीक्रियतेतरामिति ।

- **कापिलसाङ्ख्ये अहङ्कारस्वरूपम्**

भगवता महर्षिणा कपिलेन प्रतिपादिते सांख्यदर्शने प्रथमेऽध्याये द्विसप्ततितमे सूत्रे अहङ्कारस्वरूपं प्रतिपादितमस्ति। तद्यथा-

सृष्टिक्रमे प्रकृतेः द्वितीयं कार्यमहङ्कारोऽस्ति, बुद्धेरनन्तरं जातकार्यमहङ्कार एवेति। बुद्धेरहङ्कारः बुद्धेरन्तरमहदङ्कारश्चेति कथने नास्ति कश्चन भेदः। यैरुपादानतत्त्वैः बुद्धिः समुद्भवति तेष्वेव राजस्तत्त्वस्य वैशिष्ट्ये सति भवत्यहङ्कारस्य समुद्भवः। कैश्चिद् दार्शनिकैः बुद्धयहङ्कारयोरनन्तरमिति मन्वानैः विचार्यते यत् वस्तुतोऽत्र महत्तत्वहङ्कारतत्त्वमिति न वर्तते पृथक् पृथक् तत्त्वे अपि तु तत्त्वस्यैकस्यैव परिस्थितिद्वियमस्तीति प्रतीयते इति। तत्त्वश्चैतद् दर्शनेष्वन्तः करणमिति प्रथितमस्ति। तदेवान्तः करणं यदा निश्चयाऽऽत्मकज्ञानं तथाऽध्यवसायात्कं च भवति साधनन्तदा बुद्धिरिति नाम्ना समुपद्दिश्यते। तथा च तदेवान्तःकरणं यदाऽभिमानवृत्तेः साधनं भवति तदा तदेवाऽहङ्कार इति नाम्ना व्यवह्वियते। इत्थमन्तःकरणस्यैकस्यैव वृत्तिभेदतो पृथक् पृथक् नाम्नी वर्तते। वस्तुतस्तु वर्तेते ह्ययेकमेवतत्त्वमिति ।' समुपलब्धकापिलसूत्रात्मके सांख्यदर्शने लिखितमस्ति यद् वृत्तिभेदस्य नियामकः कोऽपि मूलाधारोऽवश्यमेव भवेत्।

कारणवृत्तिषु व्यवस्था समवलोक्यते। यद् कस्य कारणस्य या वृत्तिरस्ति या तस्यैव कथम्? तत्र समवगम्यते यदत्र कस्यचिद् गुणस्य भवत्याधिक्यन्तथा च कैश्चिद् भवति न्यौन्यम्। आधिक्ययोन्ये एव वर्तते हेतु भूते। सत्त्वगुणप्राधान्यादेव समवलोक्यते बुद्धेरध्यवसायात्मकाहङ्कारस्याऽभि मानाऽख्या वृत्तिः। तमोगुणस्य प्राधान्यादेव समवलोक्यते मनसः सङ्कल्पाऽऽत्मिका वृत्तिः। बाह्येन्द्रियेषु स्वरूपमेतत् स्पष्टतोऽवलोकयितुं शक्यते।

श्रोत्रेन्द्रियेण केवलं शब्द एवानुभूयते न स्पर्शादिकं त्वगिन्द्रियेण केवलं स्पर्शामेवानुभूयते न शब्दादिकम् । इत्थमेव चक्षुरिन्द्रियं रूपमेव गृह्लाति, रसनेन्द्रियं रसानेव समास्वदते। घ्राणेन्द्रियं गन्धान् एव जिघ्रति। इत्थमेव कर्मेन्द्रियाण्यपि स्वीयमेव स्वीयं कर्म कुर्वन्ति। प्रकारेणानेन समेषामपीन्द्रियाणां समेषामपि बाह्याभ्यन्तःकरणानां वृत्तयः सन्ति सुनिश्चिताः सुनिर्धारिताश्च।

इत्थमेवाऽऽहङ्कारस्यापि वृत्तिरभिमानाऽऽख्या बुद्धेश्चाऽध्यवसायात्मिका वृत्तिरस्ति सुनिश्चिता। न कथञ्चदप्यहङ्कारोऽध्यवसायङ्करोति। न च कथञ्चिदपि बुद्धिरभिमानङ्करोति। इत्थमस्ति सर्वथा व्यवस्थितम्। इत्थमत्र सांख्यदर्शने वृत्तिभेदव्यवस्था बाह्यकरणानीवान्तः करणानि चापि सुनिश्चितभेदेषु विभज्यते।[4]

तदनुसृत्य वक्तुं शक्यते। वृत्तिभेदस्य हेतुः करणभेद एव वर्तते इति कथनस्यास्य भवत्याशयो यद्-यदत्राहङ्कारन्तत्त्वं महत्तत्त्वातिरिक्तन्तत्त्वमेवाऽस्ति, न तस्यैव नामान्तरमिति अहङ्कारस्थसृष्टिः रजस्तत्त्वस्य वैशिष्ट्येन तस्य उपादानसामग्रया भवति यस्योपयोगो बुद्धितत्त्वस्य रचनायां समभूदर्थात् त्रयोगुणाः एवास्यापि सन्त्युपादानानीति ज्ञेयम्। रजस्तत्त्ववैशिष्ट्यमेव तत्त्वमेनमहङ्कारं बुद्धितत्त्वतः सर्वथा भिन्नतत्त्वान्तरमेवेति प्रतिपादयन्ति।

बुद्धितत्त्वमिवाहङ्कारतत्त्वमपि सृष्ट्यादावेव प्रत्येकस्मै ह्यात्मनि समुद्बभूव। तथा चास्य विषयेऽपि सैवास्ति प्रक्रिया यदेतत्तत्वमपि तैस्तेरूपायेस्तैस्तैः पूर्वजननसंस्कारैश्च समुत्कृष्टमुत्कृष्टं वा विधातुं शक्यते। यथा बुद्धितत्त्वम् इत्थमेवेतदपि ज्ञेयम्, यन्मूलतोऽङ्कारतत्त्वमपि बुद्धितत्त्वमपि सामान्यमेव भवति। किन्तु समाश्रयणीयस्याऽऽत्मनः पूर्वजन्मार्जितैः कर्माशयैः श्रेष्ठ्याश्रेष्ठ्ये जायते। समानापदानसामग्रयाः जायमानत्वाज्जातत्वाच्च सामान्यप्यहङ्कारतत्त्वानि भवन्ति समानानि सर्वथा। वातावरणेन जन्मान्तरसंस्कारपारवश्यन् चाऽहङ्कारतत्त्वस्य न्यौनाऽऽधिक्येमछनतोत्कटते च भवतः। शारीरिक्याः रचनायाः वैशिष्ट्येन प्रवृत्तीनां प्रवर्त्तनस्य पार्थक्येन। आहारव्यवहारादीनां वैविध्येन अहङ्कारतत्त्वस्य स्थितिषु वैलक्षण्यं समनुभूयते। परमत्रावधेयमस्ति यत् तत्राहङ्कारतत्त्वस्य मूलसृष्टौ मूलस्वरूपे च नास्ति कश्चन भेदलेशोऽपि।

भगवता महर्षिणा कपिलेन प्रणीते सांख्यशास्त्रे द्वितीयेऽध्याये षोडशतसूत्रतः समारभ्याष्टादशतमं सूत्रं यावत् अहङ्कारस्वरूपं प्रतिपादितमस्ति। तच्चेत्थम् –

अहङ्कारोऽभिमानधर्मकोऽस्ति, अस्मिन् सूत्रे धर्माधर्मयोर्भेदात् अभिमानम् एवाहङ्कारत्वेन स्वीचकार। सांख्यशास्त्रस्य प्रक्रिया च समनुसृत्याहङ्कारतत्वस्य स्वरूपादेवान्तरिन्द्रियमनः समजायत, तथा श्रोत्रादीनि पञ्चज्ञानेन्द्रियाणि वागादीनि पञ्चकर्मेन्द्रियाणि च समजायन्त। तामसादहङ्काराच्च पञ्चतन्मात्राणि समुद्भवन्ति । अहङ्कारस्य मनसादीनां च परस्परकारण-कार्यभावं समनुसृत्य समुपादानोपादेयं भावं वा समनुसृत्याऽहङ्कारस्य त्रयो भेदा जायन्ते।

1. वैकारिकोऽहङ्कारः
2. तेजसोऽहङ्कारः
3. तमसोऽहङ्कारश्चेति ।

तत्र वैकारिकादहङ्कारान् मनस्तवं समुद्भवति। तेजसादहङ्काराद् बाह्येन्द्रियाणि, तामसादहङ्काराच्च पञ्चतन्मात्राणि समुद्भवन्तीति ज्ञेयम्।

वैकारिकादहङ्कारान्मनसः समुत्पत्तिः

वैकारिकादहङ्कारान्मनसः समुद्भवो भवतीति तु प्रथममेव निर्दिष्टम्। किन्तु यद् तद्भवति केन प्रकारेणेति प्रतिपाद्यतेऽत्र। पूर्वमस्माभिनिर्दिष्टमेव रजोगुणस्याऽऽधिक्यम् एवाऽहङ्कार-

तत्त्वस्याऽहङ्कारत्वप्रतिपादिकं भवतीति तत्राहङ्कारतत्त्वे रजोगुणविशिष्टत्वात्पादको कश्चन विकारो जायते। तत्वेत्थमवगन्तव्यम् यदाहङ्कारतत्त्वैकश्च नाशो रजोगुणस्याभिवर्धते। सत्त्वगुणस्य न्यूनतामधिगच्छति ह्येतादृशी परिस्थितिरेव मनः सञ्ज्ञाम्भजते। वयमवलोकयामो यद् यैरुपादान-कारणैरहङ्कारस्य समुद्भवो भवति। तानि समुपादानकारणानि यावत् स्वीयामेवाऽवस्थां संरक्षन्ति तावदहङ्कारसंज्ञेव जायते। जाते हि न्योन्याऽऽधिक्ये यो भवति परिणामस्तमनुसृत्येव तस्य वैकारिकीरिति संज्ञा स जायेत् स च विकारोऽहङ्कारः समभूदिति तस्य संज्ञा वैकारिकोऽहङ्काररिति भवति। स एव मनसो हेतुर्भवति। इत्थश्चात्र स्पष्टीभूतम् यद्वैकारिकादहङ्कारात्मनः कथं भूदिति।'

तैजसादहङ्कारादिन्द्रियाणि जायन्ते

मनसः समुत्पन्नो या भवत्युपादानसामग्री तस्या रजोगुणस्यांशः समभिवर्धते । रजोगुणश्च भवति सर्वदा सर्वथा गतिमान् इत्येतस्मादेव हेतोः तेजः स्वरूपकोऽयमिति मन्वते। रजोगुणस्याऽऽधिक्यवशादेवोपादानसामग्री सा तैजससंज्ञा समधिगच्छति। सा च प्रक्रिया समग्रोऽपि भवत्यहङ्कारतत्त्वमेवैति तस्य नाम तैजसोऽहङ्कार इति भवति। तस्मादेव तैजसादहङ्कारादिन्द्रियाणि समुद्भवन्ति तानि चेन्द्रियाणि द्विविधानि भवन्ति। कानिचिद् भवन्ति ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि चैतिकानिचित्। इदमत्राऽवधेयमस्ति यदत्र तैजसादहङ्कारादेव ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च समुद्भवन्ति, किन्तु तत्रापि विशुद्धतैजसादहङ्कारात् समुद्भवन्ति। ज्ञानेन्द्रियाणि तथा च तत्रैव किञ्चन्मात्रायां तमोगुणस्य च वृद्धिः। रजोगुणविशिष्टत्वादेव च तस्याहङ्कारस्य संज्ञा तेजसोऽहङ्कारश्चेति भवति। उभयत्रापि च रजोगुणप्राधान्यम्भवत्येवेति नास्ति काचन विप्रतिपत्तिः। तमोगुणस्याऽ ऽपेक्षि-स्वरूपेणऽऽधिक्यणां सृष्टिं कर्मेन्द्रियाणि ज्ञानसिद्धौ भवन्त्यसमर्थानि । इन्द्रियाणां सृष्टिं यावत् सृष्टिः सात्त्विकी सृष्टिरित्यभिधीयते। आत्मनः सान्निध्यवशात् भोगापवर्गसिद्धये सन्नद्धत्वाच्च तत्त्वान्येतानि सात्त्विकानीति समुदीर्यन्ते। प्रोच्यतैषां सृष्टिः अध्यात्मसृष्टिरिति। यतो ह्यात्मनो भोगापवर्गयोः संसाधिका वर्तते।[5]

अध्यात्मसृष्टेरनन्तरतामसादहङ्कारात् पञ्चतन्मात्राणि समुद्भवन्ति। सा च सृष्टिः समभिधीयतेऽधिभूतसृष्टिरिति अहङ्कारस्य कारणसामग्रया यदा सत्त्वांशो पर्याप्तरूपेण न्यौन्यम्भजते। तदनुपातेनैव द्विगुणादप्यधिकानि रजोगुणतत्त्वानि जायन्ते। सत्त्वरजोगुणयोः मात्राऽपेक्षयाद्विगुणमात्राया जायते तमोगुणः। तदा तन्मात्राञ्जायते सृष्टिः। तमोगुणस्य प्राधान्यादैवस्य तामसोऽहङ्कारश्चेत् संज्ञा सञ्जायते, सृष्टिरैषा तन्मात्रनामधेयाऽपि वर्तते। स्थूलभूतापेक्षया सूक्ष्मतरैरिति तथा चेन्द्रियाण्यपि तन्मात्राणि साक्षात् कर्तुं सामान्यरूपेण नैव शक्नुवन्तीति, महाभूतानाञ्च सूक्ष्मरूपेण वर्तमानानि मूलकारणनि सन्तीति च प्रोच्यन्ते तन्मात्राणीति पञ्चतन्मात्राणां नामानि चेत्थं सन्ति-

1. शब्दतन्मात्रम्
2. स्पर्शतन्मात्रम्
3. रूपतन्मात्रम्
4. रसतन्मात्रम्
5. गन्धतन्मात्रञ्चेति ।

क्रमशश्चेतानि पञ्चतन्मात्राकाश-वायु-तेजो-जल-पृथिवीनां भवन्ति समुद्भवकारीणि।

इत्थमत्राहङ्कारतत्त्वस्य मूलस्वरूपं कीदृशम्भवति, तस्य स्थितयोः कारकाः सम्भवन्ति । ताभिश्च कानि कानि तत्त्वानि केन केन प्रकारेण समुद्भवन्तीति सर्वमपि प्रतिपादितम्भवतीति शम्।'[6]

**कापिलसांख्ये मनसः स्वरूपम्**

वैकारिकादहङ्कारान्मनसः समुद्भवो भवतीति निर्दिष्टम्। किन्तु समुद्भवति केन प्रकारेणेति प्रतिपाद्यतेऽत्र। पूर्वमस्माभिः अहङ्कारप्रकारेण निर्दिष्टमेव गुणस्याऽऽधिक्यमेव अहङ्कारतत्त्वस्याऽहङ्कारत्वप्रतिपादकम्भवतीति। तत्राहङ्कारतत्त्वे रजोगुणविशिष्टत्वाऽऽपादको कश्चन विकारो जायते। तच्चेत्थमवगगन्तव्यं यदहङ्कारतत्त्वे कश्चनांशो रजोगुणस्यापि वर्तते। तथा च कश्चनांशः सत्त्वगुणस्य न्यूनतामधिगच्छति एतादृशी परिस्थितिरेव मनः संज्ञाम्भजते ।

वैरूपादानकारणैरहङ्कारस्य समुद्भावो भवति, तानि समुपादानकारणानि यावत् स्वीयामेवाऽवस्थं संरक्षति तावदहङ्कारसंज्ञैव जायते। जाते हि न्यौन्याऽऽधिक्यो यो भवति परिणाम स्तमनुसृत्यैव तस्य वैकारिकरिति संज्ञा सञ्जायते। स च वैकारिकोऽहङ्कारो समभूदिति तस्य संज्ञा वैकारिकोऽहङ्कारीति भवति। स एव मनसोहेतुर्भवति।

उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च साधर्म्यात्।
गुणपरिणामविशेषान्नानात्वा बाह्यभेदाश्च ॥'

इत्येतस्यां कारिकायां मनः उभयात्मकं स्वीक्रियते। अतः विचाराणां सङ्कल्पत्वेन, इन्द्रियाणां सजातीयत्वेन मन इन्द्रियमुच्यते। मनसः अवधानं विना सर्वेषां ज्ञानेन्द्रियाणां कर्मेन्द्रियाणाञ्च स्वव्यापारसमर्थाः। अतः मनसः साहास्येनैव ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च कार्याणि कुर्वन्ति। अनेनाऽत्र मन उभयेन्द्रियात्मकं स्वीक्रियते ।

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या। सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च।।

इत्येतस्यां कारिकायां मनोऽन्तःकरणत्वेन स्वीक्रियते । यतः त्रयाणां मनोबुद्ध्यहङ्काराणां पृथक् पृथक् स्वीय-स्वीयो व्यापारोऽस्ति । एतानि लक्षण एव एतेषां त्रयोदशविशिष्टाः व्यापाराः वर्तन्ते। यथा तत्र महतो व्यापरोऽध्यवसायः। अहङ्कारस्य व्यापारोऽभिमानः। मनसो व्यापारः सङ्कल्पः।[7]

अतोऽन्तःकरणं बुद्धि-अहङ्कार-मन-दशेन्द्रियाणि इति त्रयोदशविधं वर्तन्ते। एतद्विषये अन्या कारिकाऽस्ति।

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्। कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यञ्च ॥'

अत्र मनसः अपि बुद्ध्यहङ्काराभ्यां सह करणत्वं स्वीकृतम्। परन्तु तेषां कार्याणि पृथक् पृथक्रूपेण वर्तन्ते। यथा तात्विकरूपेण प्रकृतेः त्रयोविंशतितत्वानि समुत्पद्यन्ते। तेषां कार्याणि चापि भिन्नाः वर्तन्ते। तथैव मनसश्चापि अन्तःकरणत्वेन पृथकृतत्त्वमस्माभिः स्वीक्रियन्ते। यतः मनसः कार्यमपि सङ्कल्पात्मकमस्ति । अनेन मनसः सत्ताः अपि पृथक्रूपेण स्वीक्रियते। केवलमिन्द्रियसजातीयत्वेन मनः एकादशमिन्द्रियं स्वीक्रियते। अन्तःकरणविषये अन्या कारिकाऽपि कापिलसांख्ये प्रतिपादिताऽस्ति ।

अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्। साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ।।

इत्येतस्यां कारिकायां मनः बुद्धिः अहङ्कारश्चेति त्रिविधं करणानि त्रिष्वपि कालेषु विषयान् गृह्णन्ति ।
बुद्धिः वर्तमानघटस्य ज्ञानं करोति। सहैव अतीतानागतयोः घटस्यापि अहङ्कारः वर्तमानकालीनां विषयमभिमन्यते। सहैव भूतभावि-कालेऽपि इत्थं मनोऽपि वर्तमानकाले सङ्कल्पयति। सहैव अतीतानागतयो कालत्रयोऽपि सङ्कल्पयति । इत्थमन्तःकरणेषु मनसः पृथक्सत्ताः अस्माभिः स्वीक्रियते।[8]

- **कापिलसांख्ये महत्स्वरूपम् -**

**अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।**
**सात्त्विकमेतद् रूपं तामसमस्ताद् विपर्यस्तम् ।।**

अध्यवसाय एव बुद्धेर्लक्षणमस्ति जगति कश्चिदपि पदार्थः सर्वतः प्रागिन्द्रियसन्निकर्षे समापतति तदनन्तरन्तद्विषये पदार्थोऽयमित्थम्भू-तोऽस्ति तथा चेत्थम्भूतो नास्तीति ज्ञायते, तदनन्तर-म्मयेत्थमाचरणीयमथवा नेत्थमाचरणीयमिति सन्दिह्यते, अन्ततो गत्वा सर्वथेतन्निश्चीयेत यदेतन्मया समाचरणीयमिति निश्चितम्। तदनन्तरम्मानयो कानिचित्कर्माणि करोति, कानिचिच्च विजहाति। एषा चरम-निर्माणयाऽऽत्मिका शक्तिरेव बुद्धितत्त्वनाम्ना समधिभीयते यस्य लक्षणत्वे-नाध्वसायशब्दः प्रयुक्तोऽस्ति ।

**बुद्धिरचनायां सत्त्वाऽऽधिक्यम्**

साङ्ख्यविचारपद्धर्तिं समनुसृत्य बुद्धिरचनायां सत्त्वगुणस्याधिक-म्भवत्युप-योजनम्। यद्यपि जगत्सु प्रत्येकं वस्तु त्रिगुणात्मकमस्ति, निर्माणे त्रयाणामपि गुणान्र्यौन्याधिक्येन भवति समुपयोजनम्, तदेव चाऽस्ति वस्तु वैलक्षण्यस्य वस्तु वैचित्र्यस्य च मूलं बीजम्। अत एव न किमपि वस्तु केनापि गुणेनैकेन समुत्पत्तिमर्हतीति। वस्तुतस्तु गुणानां परमविशुद्ध स्वरूपन्तेषां साम्यावस्थाऽस्ति। सैव चाऽस्ति कारणावस्था। जगन्निर्माणे चैतेषामस्ति परस्परम्मैथुनम्परमा-वश्यकम्। 'अत एव बुद्धितत्त्वस्य रचनायामपि त्रयाणामेव गुणानां सामञ्जस्यमस्ति। तथापि तत्र सत्त्वगुणस्यैव भवति प्राधान्यम्' 'रजस्तमसोः स्वल्पतरं स्वल्पमतं वास्त्युपयोजनम्'। एतदस्ति वस्तुरचनावैलक्षण्यम्।
सर्गनिरूपणे प्रकृतेः सर्वतः प्राक् महत्तत्त्वस्य उत्पत्तिर्जायते इदं तत्त्वं बुद्धिनाम्नाऽपि कथ्यते। धर्मादिरूपं धर्म, ज्ञानं, वैराग्यम्, ऐश्वर्यादिप्रकृष्टगुणयोगात् इदं तत्त्वं महत्संज्ञामुपलभ्यते। तदेव च अस्य तत्त्वस्य लक्षणं वर्तते 'महानात्मा मतिर्विष्णुर्जिष्णुः शम्भुश्च वीर्यवान्। बुद्धिः प्रज्ञोपलब्धिश्च तथा ब्रह्मा धृतिः स्मृतिः। पर्यायवाचकैरेतैमहानात्मा निगद्यते'। इदं तत्त्वं सम्पूर्णेऽस्मिन् जगति व्याप्तरूपेण वर्तते। अस्य तत्त्वस्य सर्वतः पाणिपादाः, सर्वतः अक्षीणिः शिराः च वर्तन्ते। सर्वतः मुखकरणानि च वर्तन्ते। अनेन सिद्धयति महत्तत्त्वं सर्वं रूपात्मकं सर्वत्र तिष्ठति।
जितेन्द्रियाः ज्ञानसम्पन्नाः ज्ञानेन संसारस्य दुःखात् विमुक्ता भवन्ति। महत्तत्त्वे च लीयन्ते। आदिसर्गेषु विष्णुरूपेण इदं तत्त्वं प्रकटम्, यतो हि महत्तत्त्वं समर्थं सम्पन्ना चास्ति, स्वसङ्कल्पानुसारेण सर्वत्र प्रकटयितुं समर्थः तमेव प्रभुरूपेण महत्तत्त्वरूपेण चापि स्वीक्रियते। कापिलसांख्ये यत् महत्तत्त्वस्य स्वरूपं प्रतिपदितं तद्भिन्नोऽत्र निगद्यते। अत्र महत्तत्त्वं विष्णुरूपेण ब्रह्मादिदेवस्वरूपेण च प्रतिपाद्यते । कापिलसांख्ये इदं तत्त्वं जडात्मकमचेतनत्वञ्च स्वीक्रियते। परमत्र मूर्तरूपेण सर्वशक्तिमान् ईश्वरात्मकं स्वीक्रियते अनयोः सांख्ययोः भेदो प्राप्येते ।
सर्वतः पाणिपादश्च सर्वतोऽक्षिशिरोमुखः । सर्वतः श्रुतिमाँल्लोके सर्वं व्याप्य स तिष्ठति ।। अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः । ज्ञानवन्तश्च ये केचिदलुब्धा जिमन्यवः ।।॥ विमुक्ताः सर्व एवैते महत्तत्त्वमुपयान्त्युत। विष्णुरेवाऽऽदिसर्गेषु स्वयम्भूर्वति प्रभुः ॥
महत्तत्त्वं त्रिगुणात्मकं वर्तते, महत्तत्त्वादेव त्रयो देवाः सम्भवन्, सत्त्वगुणात् विष्णोः, रजोगुणात् ब्रह्म, तमो गुणात् भगवतः शम्भवः प्रादुर्भूत्। अत एव एते त्रयो देवाः महत्तत्त्वस्य अंशभूताः सन्ति । 'विष्णुपुराणेऽपि उक्तम् 'सात्त्विको राजसश्चैव तामसश्च त्रिधा महान् इति।[9]
मात्स्ये च -
सविकारात् प्रधानात्तु महत्तत्त्वमजायत। महानिति यतः ख्यातिर्लोकानां जायते सदा ।। गुणेभ्यः क्षोभ्यमाणेभ्यस्त्रयो देवा विजज्ञिरे। एका मूर्त्तिस्त्रयो देवा ब्रह्माविष्णुमहेश्वराः ॥ इति
प्रकृतेः महत्तत्त्वत्त्वं समुत्पन्नम्। इदं तत्त्वं लोके महन्नाम्ना सुप्रसिद्धमस्ति । त्रिविधेभ्यो गुणेभ्यो त्रयो देवाः समुत्पन्नाः। एका मूर्तिः वर्तते, यस्यां ब्रह्मा-विष्णु-महेश्वराः विद्यन्ते। अणिमेत्यादिभावनिर्देशो धर्मधर्म्यभेदादेव क्रियते, महत्तत्त्वात् सर्वतः प्राक् विष्णुस्वरूपादेव प्रकटितः ततः ब्रह्मस्वरूपं प्रकटितं पश्चात् शिवस्वरूपात्मकं दृश्यते। विष्णुरेव सर्वप्रथमं प्रकटितम्, इत्थं महाभारते अर्धश्लोकेनैव उद्धृतम् 'ब्रह्माशङ्करापेक्षयाप्यादौ विष्णुरूपेणैव महानाविर्भवतीति'।[10]

**निष्कर्षः**

कथनास्यास्य तात्पर्यमिदमस्ति सांख्ये अग्रेऽपि अन्तःकरणस्य वर्णनमुपलभ्यते इदं महत्तत्त्वमांशिकरूपेण रजस्तमः संभेदेन परिणतं व्यष्टिरूपेण जीवानामुपाधिक्रमैः धर्मज्ञानवैराग्यैश्वर्यम्, अधर्माज्ञाना-वैराग्यानैश्वर्यादिरूपे युक्तीयुक्तो भवति। इत्थं यतो हि 'महदुपरागात् विपरीतम् अर्थात् महत्तत्त्वमेव रजस्तमयोः गुणयोः प्रभावादेव विपरीतक्रमेण अधर्म-अज्ञान-अवैराग्य-अनैश्वर्यादिरूपेण प्रभवति। इत्थं सांख्यदर्शनस्य द्वितीयेऽध्याये भगवता विज्ञानभिक्षुणा स्वकीयं प्रवचनभाष्ये सुस्पष्टं लिखितमस्ति-
महत्तत्त्वस्य प्राधान्येन असाधारणन्येन च अध्यवसायोवृत्तिर्भवति, अर्थात् महत्तत्त्वमहङ्कारतत्त्वं मनश्चेतानि तत्त्वानि महत्तत्त्वस्य बीजावास्था वर्तन्ते। एतानि तत्त्वानि अन्तःकरणरूपेण स्वीक्रियन्ते, प्रकृतेर्महांस्ततो अहङ्कारेत्यादि सृष्टिक्रमे शास्त्रमेव प्रमाणम्। अनुमानेन सामान्यतः कार्याणां सकारणत्वमात्रं सिद्धिर्भवति।

**सन्दर्भग्रन्थाः**

1.साङ्ख्यप्रवचनभाष्यम्, विज्ञानभिक्षुः, डॉ. धर्मानन्दशर्मा कृत हिन्दी-पदार्थानुवादसहित, अमर ग्रन्थ पब्लिकेशन्स, दिल्ली, 1998
2.सांख्यसारः,विज्ञानभिक्षुः,टीकाकार-रमाशङ्करभट्टाचार्य,भारतीय-विद्या प्रकाशन, वाराणसी, संशोधित एवं परिवर्धित द्वितीयसंस्करण, 1978

3. साङ्ख्यसिद्धान्तः, आचार्य उदयवीरशास्त्री, दिल्ली, विजयकुमार गोविन्दराम हासानन्द, 2000

4. सांख्यसुधा, प्रो. महेशप्रसादसिलोड़ी, मान्यता प्रकाशन, नवदेहली, 2011

5.सांख्यसूत्रम्, कपिलः, सं. रामशंकरभट्टाचार्यः, भारतीय विद्या प्रकाशन, वाराणसी, 1977

6.सांख्यसूत्रम्, रामशंकर भट्टाचार्य, भारतीय विद्या प्रकाशन, संशोधित तथा परिवर्धित द्वितीय संस्करण, दिल्ली, 1977

7.सांख्यतत्त्वकौमुदी, वाचस्पतिमिश्र कृत, सं. डा. गजानन शास्त्री मुसलगांवकर, चौखम्भा संस्कृत संस्थान, वाराणसी, चतुर्थ विक्रम संवत् 2041

8.सांख्यतत्त्वकौमुदी, वाचस्पतिमिश्र, पण्डितराज वंशीधरमिश्र-विरचित-साङ्ख्यतत्त्वविभाकर, सम्पादकः श्रीरामशास्त्री, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, द्वितीय संस्करण 2001

9.सांख्यतत्त्वकौमुदी, वाचस्पतिमिश्र, पं. ज्वालाप्रसादगौउकृत हिन्दीव्याख्या-सहित, चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करण 2004

10. सांख्यतत्त्वकौमुदी, वाचस्पतिमिश्रः, चौखम्भा संस्कृत सीरीज ऑफिस, वाराणसी, वि. सं. 2056

11. सांख्यतत्त्वकौमुदी, वाचस्पतिमिश्र, डा. आद्याप्रसादमिश्रकृत तत्त्वप्रभा-नामक हिन्दी व्याख्या सहित, अक्षयवट प्रकाशन, इलाहाबाद, संस्करण 1999

12.सांख्यतत्त्वकौमुदीप्रभा, (ईश्वरकृष्णकृत-सांख्यकारिका वाचस्पति-मिश्र कृत सांख्यतत्त्वकौमुदी) व अनुवादक-आद्याप्रसादमिश्र अक्षयवट प्रकाशन, इलाहाबाद प्रथमसंस्करण, 1988

13.साङ्ख्यकारिका, ईश्वरकृष्ण, वाचस्पतिमिश्रसाङ्ख्यतत्त्व-कौमुदीसहित, डॉ. गजानन मुसलगाँवकरकृत हिन्दी अनुवाद सहित, चौखम्बा संस्कृत संस्थान, वाराणसी, सातवाँ संसकरण 2000

14.साङ्ख्यकारिका, ईश्वरकृष्ण, गौडपादकृतगौडपादभाष्यसहित, पं. श्री ज्वालाप्रसादगौडकृत हिन्दी व्याख्या सहित, चौखम्बा विद्याभवन, वाराणसी, पुनर्मुद्रित संस्करण 2001

15.साङ्ख्यकारिका,ईश्वरकृष्ण, युक्तिदीपिकासहित, डॉ. रमाशङ्कर-त्रिपाठीकृत तत्त्वप्रभा संस्कृतटीका, हिन्दी अनुवाद सहित, कृष्णदास अकादमी, वाराणसी, तृतीय संस्करण 1994

16.साङ्ख्यकारिका, ईश्वरकृष्ण, माठरकृतमाठरवृत्तिसहित, पं. थानेशचन्द्र उप्रेतीकृत हिन्दी व्याख्यासहित, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी, पुनर्मुद्रित संस्करण 2001

17.साङ्ख्यकारिका, ईश्वरकृष्ण, वाचस्पतिमिश्रसाङ्ख्यतत्त्वकौमुदी, पण्डित श्रीकृष्णवल्लभाचार्यस्वामिनारायणविरचिता साङ्ख्य-कारिका तत्त्वकौमुदी-किरणावली, श्रीकृष्णवल्लभाचार्य स्वामि-नारायण-विरचितसाङ्ख्यकारिकाभाष्यम्, गौडपादकृतगौडपादभाष्य-सहितम्, व्यास प्रकाशन, वाराणसी, द्वितीय संस्करण 1989

18. साङ्ख्यकारिका, ईश्वरकृष्ण, ब्रजमोहन चतुर्वेदीकृत वसुमती संस्कृत-हिन्दी विशद् व्याख्या सहित, नेशनल पब्लिशिंग हाउस, नई दिल्ली, 1969

19. साङ्ख्यकारिका, ईश्वरकृष्ण, शङ्कराचार्यकृतजयमङ्गलाटीका, सम्पादकः हरदत्तशर्मा, कलकत्ता ओरियण्टल सीरीज सं. 19, कलकत्ता

20. सांख्यकारिका, ईश्वरकृष्णः, सं. आद्याप्रसादमिश्रः, अक्षयवट प्रकाशन, इलाहाबाद, 2027, वि. संवत्

**सन्दर्भः ग्रन्थः -**

[1] अध्यवसायो बुद्धिः। सां. सू. द्वि. अ. 13

[2] सात्विकमेतद् रूपं तामसमस्माद् विपर्यस्तम् ।। सां. का. 23

[3] अव्यभिचारात्। तथाशेषसंस्काराधारत्वात्। सां. सू. द्वि. अ. सू. 41-42

[4] चरमोऽहङ्कारः। सां. सू. द्वि. अ. सू. 72

[5] अभिमानोऽहङ्कारः एकादश पञ्चतन्मात्रं यत्मार्यम्। सां. सू. द्वि. अ. सू. 16-17

[6] सात्विकमेकादशकं प्रवर्ततेवैकृतादहङ्कारात्। सां. सू. द्वि. अ. सू.

[7] सांख्यकारिका 27

[8] सांख्यकारिका 32

[9] सांख्यकारिका पृ. 31

[10] सांख्यकारिका पृ. 32